नात: परतरो लोके महावेदीमहोत्सवात् ।
सर्व्वपापहरो योग: सर्व्वतीर्थफलप्रद: ॥
कृष्णमुद्दिश्य ये तत्र दानं ददति वै नरा: ।
यत्किञ्चिदक्षयफलं मेरुदानेन संमितम् ॥
गुण्डिकामण्डपे यान्तं भद्राकृष्णं सहाग्रजम् ।
तत्रातपश्रान्तगात्रं दर्पणेष्वभिषेचयेत् ॥
पश्चाच्च तै: शीततोयै: पुष्पकर्पूरवासितै: ।
नारिकेलजलेनाथ तथा तालफलाम्बुना ॥
रसोदकेन शुद्धेन तथा पुष्पोदकेन च ।
सर्व्वाङ्गमनुलिम्पेच्च चन्दनेन्दुमृदुद्रवै: ॥
सुगन्धिमाल्याभरणैश्चीनपट्टै: सुशोभनै: ।
चामरैश्च जलाभैश्च शीतलैर्व्यजनैस्तथा ॥
वीजयेत् पुण्डरीकाक्षं सुभद्रां बलमेव च ।
सिताभि: पानकैर्द्धैस्तथा खण्डविकारकै: ।
खर्ज्जुरैर्नारिकेलैश्च नानारम्भाफलादिभि: ।
तथा क्षीरविकारैश्च पनसैरिक्षुभिस्तथा ॥
वासितै: शीततोयैश्च गन्धताम्बूलपत्रकै: ।
सकर्पूरजपत्राद्यै: पूजयेत् परमेश्वरम् ॥
रथत्रयस्थितं देवत्रयं ये पुरुषर्षभा: ।
प्रदक्षिणं प्रकुर्व्वन्ति त्रिचतु:सप्त एव च ॥
ततोऽपराह्णे देवेशं दक्षिणानिलवीजितम् ।
शनै: शनैर्नयेद्विष्णुं मण्डपस्य च मध्यमे ॥
एवं व्रजति देवेशे सूर्य्यश्चास्तं गतोऽभवत् ।
दीपकानां सहस्राणि ज्वालितानि नरैस्तत: ॥
मण्डपे वासयेद्देवान् गुण्डिकाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
पूजयित्वा जगन्नाथं तोषयेत् गीतनृत्यकै: ।
उपहारादिभिस्तत्र सप्ताहानि जनार्द्दनम् ॥
सप्ताहं ये प्रपश्यन्ति गुण्डिकामण्डपे स्थितम् ।
माधवं रामं सुभद्राञ्च विष्णुसायुज्यमाप्नुयात् ॥
दिवा तद्दर्शनं पुण्यं रात्रौ दशगुणं भवेत् ।
यत्किञ्चित् कुरुते कर्म्म कोटिकोटिगुणं भवेत् ॥
सर्व्वं मेरुसमं दानं सर्व्वं चाश्वसमा क्रिया: ।
महावेद्यां गते कृष्णे योगोऽयं खलु दुर्लभ: ॥
अर्द्धोदयादयो योगा: स्कन्देन परिभाषिता: ।
महावेद्याख्ययोगस्य कलां नार्हन्ति षोडशीम् ॥
अष्टाहे च पुन: कृत्वा दक्षिणाभिमुखान् यान् ।
दक्षिणाभिमुखी यात्रा विष्णोरेषा प्रकीर्त्तिता ॥
कार्य्या प्रयत्नत: सा हि भुक्तिमुक्तिप्रदा भवेत् ।
दक्षिणाभिमुखं यान्तं कृष्णं पश्यन्ति ये नरा: ॥
न तेषां पुनरावृत्ति: सत्यमेतन्न संशय: ।
पुराविदो वदन्त्येतां यात्रां नवदिनात्मिकाम् ॥
तस्या: संकीर्त्तनादेव निर्म्मलो जायते नर: ।
तावतीयं महायात्रा यो यथा कर्त्तुमिच्छति ॥
सोऽपि विष्णुप्रभावेन वैकुण्ठभवनं व्रजेत् ।
उद्धृत्य सप्तपुरुषान् पापावलिसमन्वितान् ॥”४॥
अथ शयनयात्रा । स्कान्दे ।
“आषाढ़े शुक्लद्वादश्यां कुर्य्यात् स्नापमहोत्सवम् ।
मण्डपे रचयेत्तत्र शयनागारमुत्तमम् ॥
देवस्य पुरत: शय्यां रत्नादिनिर्म्मितोपरि ।
आस्तीर्य्य मृदुवेलादि मृदुचीनोत्तरच्छदाम् ॥
कर्पूरधूलिविच्छिन्नां साधुचन्द्रातपां शुभाम् ।
पुष्पगन्धयुतां मुक्तारञ्जितां चन्दनाङ्किताम् ॥
साधुद्वारां शुभां स्निग्धां नानाचित्रोपशोभिताम् ।
एवं स्नापगृहं कृत्वा निशीथे स्नापयेद्विभुम् ॥
संपूज्य भावयेदैक्यं तेषां लक्ष्म्यादिभि: सह ।
एह्येहीति च संप्रार्थ्य स्नापार्थं परमेश्वरम् ॥
नयेच्छय्यागृहद्वारं वासयेत् घटिकात्रयम् ।
पश्चाच्च तै: स्नापयेत्तान् पृथक्पलशताधिकै: ॥
सुगन्धिचन्दनैर्लिप्तान् वस्त्रालङ्करणादिभि: ।
पूजयित्वा यथान्यायं प्राञ्जलिर्मन्त्रमुच्चरेत् ॥”
जगद्वन्द्य इत्यादि ।
“सुदृढ़ं कारयेद्द्वारं विष्णो: शयनवेश्मन: ।
स्नापयित्वा जगन्नाथं लभते सुखमुत्तमम् ॥”५॥
अथ पार्श्वपरिवर्त्तनयात्रा ।
“अथ ते संप्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
नभस्यविमले पक्षे संप्राप्ते हरिवासरे ॥
विष्णो: स्नापगृहद्वारं शनैर्गत्वा प्रविश्य च ।
नमस्कृत्य जगन्नाथं पर्य्यङ्कशयितं मुदा ॥
अवचाश्च शनैर्द्वारं पूजयेदुपचारकै: ।
प्रणम्य भक्त्या तत्पादौ स्नापयेदुत्तराननम् ॥”
मन्त्रञ्चेमं पठेत् ।
“ॐ देवदेव ! जगन्नाथ ! कल्याणं परिकल्पय ।
परिदृत्तमिदं सर्व्वं यथा स्थावरजङ्गमम् ॥
यत् दृष्ट्वा चैष्टितैरेव जाग्रत्स्वप्नसुषुप्तिभि: ।
जगद्धिताय सुप्तोऽसि पार्श्वेन परिवर्त्तय ॥
परिवर्त्तनकालोऽयं जगत: पालनाय वै ।
त्वदग्रजोऽयं शक्रोऽपि ध्वजे तिष्ठतु सतृष्णक: ।
इदं त्वत्पादकमलं विसृज महिं तच्चलम् ।
मही जलं प्रावयति प्रजापालनहेतुकम् ॥
इति संप्रार्थ्य देवेशं विनयात्तोषयेत्तत: ।
व्यजनैश्चामरैश्चैव वीजयेत् परमेश्वरम् ॥
सुगन्धिचन्दनैरस्य सर्व्वाङ्गं परिलेपयेत् ।
स्वादूनि भक्ष्यद्रव्याणि पायसादीनि दापयेत् ॥
शय्यागृहद्वारि विभो: शनैर्भक्त्या निवेदयेत् ।
देवमुद्दिश्य यत् कुर्य्यात् सर्व्वमक्षयतां व्रजेत् ॥
पार्श्वे च जन्मदिवसे उपवासपरो भवेत् ॥”
एवं आश्विनशुक्लैकादश्यां पूर्व्वोक्तविधानेन
श्रीकृष्णस्य वामपार्श्वपरिवर्त्तनं कार्य्यम् ।
मतान्तरे ।
“शुभे चैवाश्विने मासि महामायां प्रपूजयेत् ।
सौवर्णीं राजतीं मार्त्तीं विष्णुमायां महेश्वरीम् ।
हिंसा चैव न कर्त्तव्या कदाचिद्विष्णुपूजकै: ॥”६॥
अथोत्थानयात्रा ।
“एकादश्यान्तु कार्त्तिक्यां शुक्लायां पृथिवीपते ।
कृष्णमुत्थापयेद्भक्त्या पूजयित्वा जगद्गुरुम् ।
पूर्व्ववत् पूजयित्वा तु प्रातर्मन्त्रं समुच्चरेत् ॥”
मन्त्रस्तु ।
“ॐ उत्तिष्ठ देवदेवेश ! तेजोराशे जगत्पते ! ।
वीक्ष्यैतत् सकलं देव ! प्रसुप्तं तव मायया ॥
प्रफुल्लपुण्डरीकाक्ष ! श्रीहरे ! शयनेन वै ।
त्वया दृष्टं जगदिदं परमं सुखमेष्यति ॥
ये ते स्मार्त्ता: क्रिया: सर्व्वा: प्रवर्त्तन्ते ततो ध्रुवम् ।
इत्युत्थाप्य जगन्नाथं वेणुवीणादिनि:स्वनै: ॥
जयशब्दैस्तथा देवं नयेयुर्नृत्यमण्डपम् ।
तैलेनाभ्यज्य तोयेन स्नापयेत पुरुषोत्तमम् ।
पश्चाच्च तैर्नारिकेलरसै: फलरसैस्तथा ॥
सुगन्धामलकेनाथ यवकल्केन लेपयेत् ।
घर्षयेत्तुलसीचूर्णैर्लेपयेद्गन्धचन्दनै: ॥
पुष्पवासिततोयैश्च कुशरत्नोदकैस्तथा ।
स्नापयित्वा च यत् पापं बहुजन्मोपपादितम् ॥
महोपचारै: संपूज्य विष्णुं नीराजयेत्तत: ।
कृताञ्जलिपुटो भूत्वा प्रार्थयेत् परया मुदा ॥”७॥
अथ प्रावरणयात्रा ।
“मार्गशीर्षे सिते पक्षे कुर्य्यात् प्रावरणोत्सवम् ।
कृत्वा दृष्ट्वा नरो भक्त्या वैष्णवं लोकमाप्नुयात् ॥
षाषोऽधिवासं कुर्व्वीत पञ्चम्यां निशि कर्म्म-
वित् ।
प्रभाते मण्डलं कुर्य्यात पद्ममष्टदलान्वितम् ॥
दिक्पालान् पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ।
चण्डप्रचण्डौ च बहिश्चतुर्द्दिक्षु प्रपूजयेत् ॥
तन्मध्ये स्थापयेद्दृष्णं क्षालयेदुष्णवारिणा ।
पूजयित्वा जगन्नाथं गन्धतैलेन दीपकम् ॥
दत्वा कृष्णाय भक्त्या तु गीतवाद्यैर्नयेन्निशाम् ।
प्रात: प्रपूजयेद्देवं नानाद्रव्यै: सुशोभनै: ॥
सप्तभि: सप्तभिर्द्देवान् वासोभि: परिवेष्टयेत् ।
सुलवणैश्च सर्व्वाङ्गे शीतप्रावरणैर्द्विजा: ॥
दूर्व्वाक्षतै: प्रपूज्याथ कुर्य्यान्नीराजनां विभो: ।
भगवन्तं समुद्दिश्य ब्राह्मणेभ्य: प्रदापयेत् ॥
गुरुभ्यश्चान्यदेवेभ्यो दीनानाथेभ्य एव च ।
शीतप्रावरणं दद्यात् वस्त्रं परमया मुदा ॥
ददाति भगवान् प्रीतस्तस्मै वरमनुत्तमम् ॥”८॥
अथ पुष्यस्नानयात्रा ।
“पुष्यस्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणा पुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ।
पौषे मासि तु तत् कुर्य्यात् पुष्यस्नानोत्सवं हरे: ॥
चतुर्द्दशीनिशायान्तु कुम्भानामधिवासनम् ।
रात्रौ जागरणं कृत्वा प्रातर्वह्निं प्रकीरयेत् ॥
ब्रह्मविष्णुशिवेभ्यश्च प्रत्येकं समिधं क्रमात् ।
जुहुयात् पूजयित्वा तु तदन्ते पुरुषोत्तमम् ।
पूजयेदुपचारैस्तु आदर्शे प्रतिबिम्बितम् ।
तत: पुरुषसूक्तेन कुम्भांस्तानभिमन्त्रयेत् ।
क्रमात् देवस्य शिरसि स्नापयेद्विधिवत्तत: ॥”
स्कन्दमुक्तम् ।
“तत: पश्चात्तैलेनैव वासुदेवञ्च क्षालयेत् ।
जप्त्वा सूक्तं पुनर्व्विप्र उपचारै: प्रपूजयेत् ॥
दूर्व्वाङ्कुराद्यै: स्तुतिभिर्वाद्यै: संपूज्य केशवम् ।
समन्ताद्विकिरेद्देवं कर्पूराद्यै: सुतण्डुलान् ॥
नीराजयेज्जगन्नाथं कर्पूरयुतवर्त्तिभि: ।
तत: प्रदक्षिणं कृत्वा दण्डवत् प्रणमेत् क्षितौ ॥
पुष्यस्नानोत्सवं पुण्यं ये पश्यन्ति मुदान्विता: ।
सर्व्वसम्पन्नकामास्ते व्रजेयुर्व्वैष्णवं पदम् ॥”९॥
अथ नवशस्ययात्रा ।
“कुर्य्याद्दयनसंक्रान्त्यां नवशस्यमहोत्सवम् ।
संक्रान्ते: पूर्व्वदिवसे नवं शालिं सकुङ्कुमम् ।
प्रासादपूर्व्वदेशे तु स्थापयित्वाधिवासयेत् ॥”